श्रीमत्परांकुशमुनये नमः
श्रीमते रामानुजाय नमः
श्रीमद्रम्यजामातृगुरवे नमः

# यतिपतिदिनचर्या

यतिपतिदिनचर्यां यश्चकारातिभोग्याम्
वरवरमुनिपौत्र स्सौम्यजामातृनामा।
गुरुरमलगुणानां वैष्णवानां मुदे तम्
गुरुजनवरमीडे गोमठाख्यान्ववायम्।।

श्रीमद्रङ्गे दिव्यधाम्नि श्रीश्रीकान्तमनोहरे
वसन्तं गुरुमार्याणां वन्दे रामानुजं मुनिम्।।१
ब्राह्मे मुहूर्ते चोत्थाय ध्यात्वा गुरुपरंपराम्
रहस्यत्रितयं रम्यं परव्यूहादिकांस्तथा।।२
पंचप्रकारांश्च हरेरर्चिरादिगतेःक्रमम्
ध्यायन्तं कूरनाथाद्यैस्सेव्यमानं गुरूत्तमैः।।३
चतुःश्लोकीं स्तोत्ररत्नं स्तोत्रं यामुनवक्त्रकम्
भक्तांघ्रिरेणुश्रीसूक्तीः प्रबोधनपराश्शुभाः।।४
प्राबोधिकीश्च गोदाया स्सूक्तीर्भागवतैस्सह
अनुसंदधतं सम्यगाश्रये यतिशेखरम्।।५
ततःप्रत्यूषसमये भक्तैश्शिष्यैर्यतीश्वरैः



श्रीरंगधाम नत्वा तदुदग्भागाश्रितां नदीम् ।।६
कावेरीं श्रीमतीं गत्वा श्रीशध्यानपुरस्सरम्
श्रीपतेराज्ञया सिद्धाः कृत्वा पौर्वाह्निकीःक्रियाः ।।७
समुपेत्य निजंधाम नत्वा स्वाराध्यमच्युतम्
स्वमतस्थायिनस्सर्वान्वेदपारायणेरतान् ।।८
वेदांततर्कमीमांसाव्याख्यातॄन्वैष्णवानपि
इतिहासपुराणादिपारायणपरानपि ।।९
कर्मयोगादिनिरतान् परव्यूहादिषु स्थितान्
श्रीमच्छठारिमुख्यानां मुनीनां सूक्तितत्परान् ।।१०
सर्वानुपेत्य सस्नेहं नंदयंतं नमामि तम्
ततःश्रीरंगराजस्य सेवार्थं स्वाश्रितैस्सह ।।११
प्रयांतं मंत्ररत्नानुसंधानासक्तचेतसम्
दक्षिणेन धृतश्रीमत्त्रिदंडं पाणिनादरात् ।।१२
अन्यपाणितलस्पृष्टकूरनाथकरांबुजम्
प्रदक्षिणीकृत्य शनैः श्रीरंगं धामतन्महत् ।।१३
चतुराननानामानं समेत्यानम्य गोपुरम्
गोदां शठारिं योगींद्रं बलिपीठं तथैव च ।।१४
प्रदक्षिणक्रमेणैव पाकशालालयां श्रियम्
श्रीमद्रंगावरवरं विमानं रंगसंज्ञकम् ।।१५
सेनापतिं च निचुलां नायिकां रंगिणः पदे

वासुदेवं द्वारपालौ वैनतेयं प्रणम्य च ।।१६
मंगलाशासनं कृत्वा तत्रतत्र यथोचितम्
ऊरीकृत्य च तीर्थाद्यमुल्लसंतं मुनिं भजे ।।१७
छत्रोपलक्षितद्वारं ततश्श्रीमदुपेत्य च
आद्यमर्चावताराणामाविर्भूतं यदृच्छया ।।१८
इक्ष्वाकूणां कुलधन मिष्टदैवं श्रियःपतिम्
कावेरीपुलिने रम्ये शेषपर्यंकशायिनम् ।।१९
नाथयामुनपूर्वाणां गुरूणां कुलदैवतम्
श्रीरंगराजं देवेशं दृष्ट्वाचार्यपुरस्सरम् ।।२०
साष्टांगं सम्यगानम्य सहशिष्यैश्च भक्तितः
अंतःप्रविश्य सामोदमामोदस्तंभमेव च ।।२१
श्रीभट्टनाथ श्रीसूक्तै र्मंगलाशासनात्मकैः
जितंतास्तोत्ररत्नाभ्यां भीतिप्रीति पुरस्सरम् ।।२२
मंगलाशासनं शौरेः कुर्वंतं गुरुमाश्रये
ततो विमाने प्रणवाकारे व्यक्ते स्वयंभुवि ।।२३
दिव्यसिंहासने रम्ये स्थितं पद्मासनेSग्रतः
कस्तूरीतिलकाद्रम्यात्कांतफालतलं हरिम् ।।२४
कंजाक्षं कांतवदनं कमनीयांगसुंदरम्
पाणिपद्मचतुष्केण स्वाश्रिताभीष्टदायिनम् ।।२५
शंखचक्रेच दधतं गदामभयमुद्रिकाम्
आसन्नाभ्यां रमाभूभ्यां पार्श्वयोः पर्युपासितम् ।।२६



सर्वावयव सौंदर्यादभिरामवराभिधाम्
संप्राप्तं भट्टनाथोक्त्या तदा गोदासमर्पणे ।।२७
संसेव्यानंदभरितं संश्रये यतिशेखरम्
तत श्श्रीरंगराजस्य श्रीमत श्शेषशायिनः ।।२८
पादारविंदे परमे भक्ताभीष्टप्रदे शुभे
सौवर्णकाहलाकारे जंघे दिव्येचजानुनी ।।२९
कदलीकांत कांडोरु युगलंचाति सुंदरम्
कांचनांबरखंडाभ्यां कमनीयकटीतटम् ।।३०
दिव्यांसनाभिमध्यंच त्रिवल्या शोभितोदरम्
लक्ष्मीकेलिगृहं रम्यं ललितं कौस्तुभश्रिया ।।३१
वक्षस्स्थलं मनोहारि वैजयंत्या विभूषितम्
ग्रैवेयभूषारुचिरं कंठं कंबुसमाकृतिम् ।।३२
उपधानीकृतं बाहुमुत्तमांगसमीपतः
दक्षिणंच तथा जानुविश्रांतं दक्षिणं भुजम् ।।३३
पद्माभिरामवदनं पद्मपत्रेक्षणद्वयम्
सुभ्रूयुगं सुनासंच सुकपोलतलद्वयम् ।।३४
सुंदरं चुबुकं चापि सुस्मिताधरपल्लवम्
कांतकुंडलसंशोभिकर्णपाशयुगं तथा ।।३५
सुललाटं च तत्रोर्ध्वपुंड्रंचापि ललाटिकाम्
सर्वाधिराज्यपिशुनं सर्वदेव नमस्कृतम् ।।३६
दिव्यरत्नकिरीटंच दर्शंदर्शं पुनःपुनः

मुनिवाहनयोगींद्रसूक्त्युच्चारणपूर्वकम् ।।३७
आपादचूडं संसेव्य सर्वावयव भोग्यताम्
श्रीरंगराजं शरणं प्रार्थयंतं भजामि तम् ।।३८
ततः श्रीरंगराजस्य श्रीमतीं धृतशाटिकाम्
पाद्यतीर्थंप्रसादं च पादुकांमालिकां शुभाम् ।।३९
अंगीकृत्य कृपामूल मनुज्ञाप्याश्रितैस्सह
विमानं प्रणवाकारं विधायांतःप्रदक्षिणम् ।।४०
छत्रोपलक्षितद्वारा त्प्राग्देशे श्रीशभक्तितः
स्थित्वा कालं क्षणं देवमनुभूय पुनःपुनः ।।४१
द्वारात्तस्माद्बहिश्चैत्य नत्वा क्षामणपूर्वकम्
बलिपीठं ततःप्राप्य प्रणमंतं भजामि तम् ।।४२
ततो महामंटपं तदेत्य श्रीरंगशायिनः
कैंकर्यवर्धकान् भक्तान् किंकरांश्चानुमान्य च ।।४३
श्रीरंगशयमुद्वेलं परामृश्योत्तरोत्तरम्
कलिजिन्निर्मितं सम्यग्धान्यागारंच योगिनः ।।४४
श्रीगोपुरवरासीनमानम्य नृहरिं ततः
श्रीरंगराजमहिषीं सेव्यां सर्वात्मभिस्सदा ।।४५
श्रीशाश्रये च जीवानां प्राप्तां पुरुषकारताम्
जननीं सर्वलोकानां श्रियं देवीमुपेत्य च ।।४६
संसेव्य शिष्यैर्भक्तैश्च मंगलाशास्ति पूर्वकम्
तीर्थादिकं च स्वीकृत्य परिक्रम्य प्रदक्षिणम् ।।४७



सहस्रस्तंभसंयुक्तं नमस्कृत्वाच मंटपम्
स्वीयंमठं समासाद्य सच्चिष्यैः प्रेमपूर्वकम् ।।४८
व्याख्यानकूटे विमले विद्वज्जननिषेविते
पद्मासनस्थं पद्माक्षपादाब्जन्यस्तमानसम् ।।४९
प्रसन्नवदनांभोजं प्रफुल्लांबुजलोचनम्
ऊर्ध्वपुंड्रैर्विराजंतमुल्लसद्भिर्मनोहरैः ।।५०
ब्रह्मसूत्रेण शुभ्रेण शोभितं ब्रह्मतेजसा
पद्माक्षतुलसीमालापरिष्कृतभुजांतरम् ।।५१
त्रिदंडमंडितोरस्कं दिव्यज्ञानामृतोदधिम्
काषायवस्त्रसंशोभि कटीतटमनोहरम् ।।५२
श्रीमद्वैष्णव सिद्धांत प्रतिष्ठापन देशिकम्
वेदांतविद्यां विमलां व्याकुर्वंतं मृदूक्तिभिः ।।५३
शिष्येभ्यो हितकामेभ्यः श्रीशशेषत्वबोधिनीम्
भक्तैर्भागवतैश्चापि सेव्यमानं यतीश्वरम् ।।५४
श्रीभाष्यकारं सेवेऽहं श्रीकांतानंदवर्धनम्
ततः श्रीपादतीर्थैस्स्वैश्शिष्याणांच महात्मनाम् ।।५५
सतां सफलयंतं तं संश्रये यतिशेखरम्
ततो माधाह्निकं कृत्यमनुष्ठाय यथाविधि ।।५६
स्वीयं कुलधनं श्रीशमाराध्य करुणाकरम्
श्रीमद्रंगाधिराजस्य पूजां माध्याह्निकीं शुभाम् ।।५७

संजातां भक्तितः कृत्वा भक्तै र्यतिवरैस्सह
हार्दपूरुषभोग्यं चेत्यनुयागं विधाय च ।।५८
प्रसादपात्रं कुर्वाणं भक्तवर्गं यथोचितम्
प्रपद्ये भक्तवर्गाणां पारिजातं यतीश्वरम् ।।५९
ततश्चैकांतमाश्रित्य सन्निविष्टं कृतांजलिम्
श्रीभूपतेश्च चरणौ चिंतयंतं भजामि तम् ।।६०
ततश्शठारियोगींद्र सूक्त्यर्थानुभवैर्मुहुः
भक्तानां भगवद्भक्तिं वर्धयंतं नमामि तम् ।।६१
ततस्सायंतनं कर्म कृत्त्वा श्रीरंगशायिनम्
ध्यात्वा प्रपद्ये देवेशमाराध्य स्वीयमच्युतम् ।।६२
वेदार्थ वाक्य तत्त्वार्थै र्विमलज्ञानसंपदः
बोधयंतं निजान् भक्तान्पुण्यश्लोकं नमामि तम् ।।६३
तत श्श्रीशेष पर्यंके शयानं रंगशायिनः
सर्वोपचारसहितं योगनिद्रात्मकं हरेः ।।६४
श्रुत्वा श्रीमति पर्यंके सौम्ये कृष्णाजिनात्मके
संवाह्यमानचरणं सच्छिष्यैश्च गुरूत्तमैः ।।६५
पत्युःश्रियःप्रसादेन भगवद्योगमास्थितम्
भगवत्प्राप्तिघटकं स्वाश्रितानां महात्मनाम् ।।६६
श्रीभाष्यकारं यमिनं यतिराजं दयांबुधिम्
प्रपन्नजनकूटस्थं प्रपद्ये भक्तवत्सलम् ।।६७



शेषांशेनावतीर्णाय श्रीरामानुजयोगिने
गुरूणां गुरवेभूयान्नित्यश्रीर्नित्यमंगलम् ।।६८

श्रीमतीं यतिराजस्य दिनचर्यामिमां पठन्
प्राप्नुयात्परमांभक्तिं यतिराजपदाब्जयोः ।।६९

श्रीमद्रंगे महति नगरे नित्यवासी महात्मा
त्रय्यंतार्थस्थितिमुपदिशन्भूतले पुण्यकीर्तिः
श्रीमान्रंगेश्वरचरणयोर्मंगलानिप्रयुंजन्
शेषांशेन प्रथितविभवो भाति रामानुजार्यः ।।७०

## इति यतिपतिदिनचर्या

मंडयं नायक रामानुजः